# Vishnuproktam Shivarchanopadesham 4

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૪

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 4

File name : viShNuproktaMshivArchanopadesham4.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 370-385||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૪

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

દેવા ઊચુઃ

વિષ્ણો વેદાર્થતત્વજ્ઞ શિવપૂજાપરાયણ ।
કિં ધ્યેયં કિં પરં બ્રહ્મ વદ નિશ્ચિત્ય સાદરમ્ ॥ ૩૬૮॥

અગસ્ત્ય ઉવાચ

ઇતિ તદ્વચનં શ્રુત્વા વિષ્ણુર્હૃષ્ટઃ કૃતાઞ્જલિઃ ।
પ્રણમ્ય શિરસા શમ્ભુમુવાચ દ્વિજસત્તમ ॥ ૩૬૯॥

વિષ્ણુઃ (ઉવાચ)

ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપં ભજામ્યહમ્ ॥ ૩૭૦॥

શિવ એવ પરં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહમ્ ।
નિલિપ્તો (નિર્મલો) નિર્ગુણો નિત્યસ્તુરીયઃ શિવ ઉચ્યતે ॥ ૩૭૧॥

સચ્ચિદ્ઘનો નિરાકારો નિર્દ્વન્દ્વઃ સ નિરામયઃ ।
સૃજત્યવત્યત્યસ્માન્સ ભવાજત્વાદ્યુપાધિભિઃ ॥ ૩૭૨॥

અદૃષ્ટેનાસ્મદાદીનાં તસ્યેચ્છૈવ પ્રજાયતે ।
ભવત્વોપાધિમાશ્રિત્ય સૃજત્યેતજ્જગચ્છિવઃ ॥ ૩૭૩॥

લીલયૈવ સૃજત્યસ્માનાયાસોઽસ્ય ન કશ્ચન ।
મૃડત્વોપાધિમાશ્રિત્ય પાતિ સર્વમુમાપતિઃ ॥ ૩૭૪॥

લીલયૈવાવતઃ સર્વં તસ્યાયાસો ન કશ્ચન ।
હરત્વોપાધિમાશ્રિત્ય સ હન્ત્યસ્માન્પિનાકભૃત્ ॥ ૨૭૫॥

સ હન્ત્યસ્માઁલ્લીલયૈવ તસ્યાયાસો ન કશ્ચન ।
શિવસ્ય વસ્તુતઃ કૃત્યં તસ્ય નાસ્ત્યેવ સર્વથા ॥ ૩૭૬॥

તથાપિ લીલયૈવાસ્માન્ સૃજત્યવતિ હન્તિ ચ ।
સ્વતન્ત્રસ્ય મહેશસ્ય સર્વજ્ઞસ્યામિતાત્મનઃ ॥ ૩૭૭॥

સૃષ્ટ્યાદાવિતરાપેક્ષા નાસ્તિ સર્વાત્મના સુરાઃ ।
સ તુરીયોઽસ્મદાદીનાં ન પ્રત્યક્ષઃ કદાચન ॥ ૩૭૮॥

પરન્તુ વેદવેદાન્તૈસ્તદ્રૂપમવગમ્યતે ।
શ્રુતિસ્મૃતિપુરાણાદ્યૈઃ શિવોઽસ્તીત્યુચ્યતે તતઃ ॥ ૩૭૯॥

શ્રુત્યાદ્યુક્તપ્રકારેણ સ સેવ્યઃ સર્વસાધનૈઃ ।
સતતં યૈસ્તપસ્તપ્તં બહુધા બહુસાધનૈઃ ॥ ૩૮૦॥

તેષામેવ શિવે ભક્તિઃ શ્રદ્ધા ચૈવોપજાયતે ।
અનન્તમવ્યયં શાન્તં શિવમક્ષરમદ્વયમ્ ॥ ૩૮૧॥

અવિજ્ઞાયાન્યથા જ્ઞાત્વા ભવન્ત્યત્યન્તદુઃખિતાઃ ।
શિવો હિ નિર્ગુણોઽનન્તસ્તુરીય ઇતિ ધીરપિ ॥ ૩૮૨॥

સહસા ન ભવત્યેવ સંસારાવિષ્ટચેતસામ્ ।
યેષાં ન વિષયાસક્તિર્યે ચ નિર્દગ્ધકલ્મષાઃ ॥ ૩૮૩॥

તેષામેવ શિવે ભક્તિઃ શ્રદ્ધા ચૈવોપજાયતે ।
ધર્માસ્તપાંસિ દાનાનિ યાગાશ્ચ વિવિધાઃ સુરાઃ ॥ ૩૮૪॥

શિવે પ્રામાણ્યબુદ્ધિં ચ જનયન્તિ ન સંશયઃ ॥ ૩૮૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનમહિમોપદેશં ૪ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૩૭૦-૩૮૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 370-385..

Notes:
Upon being requested by Deva-s દેવાઃ; Viṣṇu વિષ્ણુ tells them that He is worshiping Śiva શિવ and delivers Upadeśa ઉપદેશ about merits of doing the same.

Proofread by Ruma Dewan

*Vishnuproktam Shivarchanopadesham 4*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*